॥ श्रीसीतारामचन्द्राभ्यां नमः ॥
॥ श्रीमते रामानन्दाचार्याय नमः ॥
॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥

अद्भुत रामायणे

॥ श्रीराम परम तत्त्व वर्णन ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Chitrakūṭa Tulasīpīṭhādhiśvara
Jagadguru Rāmānandāchārya
Śrī Svāmī Rāmabhadrāchārya

सीतानाथ समारम्भां रामानन्दार्य मध्यमाम् ।
अस्मदाचार्य पर्यन्तां वन्दे श्री गुरु परम्पराम् ॥

सर्वलोकैकनिर्माता सर्वलोकैकरक्षिता ।
सर्वलोकैकसंहर्ता सर्वात्माहं सनातनः ॥ १ ॥

सर्वेषामेव वस्तूनामंतर्यामी पिता ह्यहम् ।
मय्येवान्तःस्थितं सर्वं नाहं सर्वत्र संस्थितः ॥ २ ॥

भवता चाद्भुते दृष्टं यत्स्वरूपं तु मामकम् ।
ममैषा ह्युपमा वत्स मायया दर्शिता मया ॥ ३ ॥

सर्वेषामेव भावानामंतरा समवस्थितः ।
प्रेरयामि जगत्सर्वं क्रियाशक्तिरियं मम ॥ ४ ॥

ययेदं चेष्टते विश्वं मत्स्वभावनुवर्ति च ।
सोऽहं काले जगत्कृत्स्नं करोमि हनुमन् किल ॥ ५ ॥

संहराम्येकरूपेण द्विधावस्था ममैव तु ।
आदिमध्यांतनिर्मुक्तो मायातत्त्व प्रवर्तकः ॥ ६ ॥

क्षोभयामि च सर्गादौ प्रधानपुरुषावुभौ ।
ताभ्यां संजायते सर्वं संयुक्ताभ्यां परस्परम् ॥ ७ ॥

महदादिक्रमेणैव मम तेजो विजृंभितम् ।
यो हि सर्वजगत्साक्षी कालचक्रप्रवर्तकः ॥ ८ ॥

हिरण्यगर्भो मार्तंडः सोऽपि मद्देहसंभवः ।
तस्मै दिव्यं स्वमैश्वर्यं ज्ञानयोगं सनातनम् ॥ ९ ॥

दत्तवानात्मजावेदान्कल्पादौ चतुरः किल ।
स मन्नियोगतो ब्रह्मा सदा मद्भाव भावितः ॥ १० ॥

दिव्यं तन्मामकैश्वर्यं सर्वदा वहति स्वयम् ।
स सर्वलोकनिर्माता मन्नियोगेन सर्ववित् ॥ ११ ॥

भूत्वा चतुर्मुखः सर्वं सृजत्येवात्मसंभवः ।
योऽपि नारायणोनन्तो लोकानां प्रभवाव्ययः ॥ १२ ॥

ममैव परमा मूर्तिः करोति परिपालनम् ।
योऽन्तकः सर्वभूतानां रुद्रः कालात्मकः प्रभुः ॥ १३ ॥

मदाज्ञयाऽसौ सततं संहरत्येव मे तनुः ।
हव्यं वहति देवानां कव्यं कव्याशिनामपि ॥ १४ ॥

पाकं च कुरुते वह्निः सोऽपि मच्छक्तिचोदितः ।
भुक्तमाहारजातं यत्पचत्येतदहर्निशम् ॥ १५ ॥

वैश्वानरोऽग्निर्भगवानीश्वरस्य नियोगतः ।
यो हि सर्वांभसां योनिर्वरुणो देवपुंगवः ॥ १६ ॥

स संजीवयते सर्वमीशस्यैव नियोगतः ।
योऽन्तस्तिष्ठति भूतानां बहिर्देवो निरंजनः ॥ १७ ॥

मदाज्ञयासौ भूतानां शरीराणि बिभर्ति हि ।
योऽपि संजीवनो नृणां देवानाममृताकरः ॥ १८ ॥

सोमः स मन्नियोगेन चोदितः किल वर्तते ।
यः स्वभासा जगत्कृत्स्नं प्रकाशयति सर्वदा ॥ १९ ॥

सूर्यो वृष्टिं वितनुते शास्त्रेणैव स्वयंभुवः ।
योऽप्यशेषजगच्छास्ता शक्रः सर्वामरेश्वरः ॥ २० ॥

यज्ञानां फलदो देवो वर्ततेऽसौ मदाज्ञया ।
यः प्रशास्ता ह्यसाधूनां वर्तते नियमादिह ॥ २१ ॥

यमो वैवस्वतो देवो देवदेवनियोगत ।
योऽपि सर्वधनाध्यक्षो धनानां संप्रदायकः ॥ २२ ॥

सोऽपीश्वरनियोगेन कुबेरो वर्तते सदा।
यः सर्व रक्षसां नाथस्तापसानां फलप्रदः॥ २३॥

मन्नियोगादसौ देवो वर्तते निर्ऋतिः सदा।
वैतालगणभूतानां स्वामी भोगफलप्रदः॥ २४॥

ईशानः सर्वभक्तानां सोऽपि तिष्ठेन्ममाज्ञया।
यो वामदेवोंगिरसः शिष्यो रुद्रगणाग्रणीः॥ २५॥

रक्षको योगिनां नित्यं वर्ततेऽसौ मदाज्ञया।
यश्च सर्वजगत्पूज्यो वर्तते विघ्नकारकः॥ २६॥

विनायको धर्मनेता सोऽपि मद्वचनात्किल।
योऽपि वेदविदा श्रेष्ठो देवसेनापतिः प्रभुः॥ २७॥

स्कंदोऽसौ वर्तते नित्यं स्वयंभूप्रतिचोदितः।
ये च प्रजानां पतयो मरीच्याद्या महर्षयः॥ २८॥

सृजंति विविधं लोकं परस्यैव नियोगतः।
या च श्रीः सर्वभूतानां ददाति विपुलां श्रियम्॥ २९॥

पत्नी नारायणस्यासौ वर्तते मदनुग्रहात्।
वाचं ददाति विपुलां या च देवी सरस्वती॥ ३०॥

सापीश्वरनियोगेन चोदिता संप्रवर्तते।
याऽशेष पुरुषाघोरान्नरकात्तारयत्यपि॥ ३१॥

सावित्री संस्मृता देवी देवाज्ञानुविधायिनी।
पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी॥ ३२॥

यापि ध्याता विशेषेण सापि मद्वचनानुगा।
योऽनंतो महिमानंतः शेषोऽशेषाऽमरप्रभुः॥ ३३॥

दधाति शिरसा लोकं सोऽपि देवनियोगतः ।
योऽग्निः संवर्तको नित्यं वडवारूपसंस्थितः ॥ ३४ ॥

पिबत्यखिलमंभोधिमीश्वरस्य नियोगत ।
आदित्या वसवो रुद्रामरुतश्च तथाश्विनौ ॥ ३५ ॥

अन्याश्च देवताः सर्वा मच्छासनमधिष्ठिताः ।
गंधर्वा उर्गा यक्षाः सिद्धाः साध्याश्च चारणाः ॥ ३६ ॥

भूतरक्षःपिशाचाश्च स्थिताः शास्त्रे स्वयंभुवः ।
कलाकाष्ठानिमेषाश्च मुहूर्ता दिवसाः क्षणाः ॥ ३७ ॥

ऋत्वब्दमासपक्षाश्च स्थिताः शास्त्रे प्रजापते ।
युगमन्वंतराण्येव ममतिष्ठंति शासने ॥ ३८ ॥

पराश्चैव परार्द्धाश्च कालभेदास्तथापरे ॥
चतुर्विधानि भूतानि स्थावराणि चराणि च ॥ ३९ ॥

नियोगादेव वर्तंते सर्वाण्येव स्वयंभुवः ।
पत्तनानि च सर्वाणि भुवनानि च शासनात् ॥ ४० ॥

ब्रह्मांडानि च वर्तंते देवस्य परमात्मनः ।
अतीतान्यप्यसंख्यानि ब्रह्मांडानि महाज्ञया ॥ ४१ ॥

प्रवृत्तानि पदार्थौघैः सहितानि समं ततः ।
ब्रह्मांडानि भविष्यंति सह वस्तुभिरात्मगैः ॥ ४२ ॥

हरिष्यंति सहैवाज्ञां परस्य परमात्मनः ।
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ ४३ ॥

भूतादिरादिप्रकृतिर्नियोगान्मम वर्तते ।
याऽशेषसर्वजगतां मोहिनी सर्वदेहिनाम् ॥ ४४ ॥

मायापि वर्तते नित्यं सापीश्वरनियोगतः ॥
विधूय मोहकलिलं यथा पश्यति तत्पदम् ॥ ४५ ॥

सापि विद्या महेशस्य नियोगाद्वशवर्तिनी ।
बहुनात्र किमुक्तेन मम शक्त्यात्मकं जगत् ॥ ४६ ॥

मयैव पूर्यते विश्वं मय्यैव प्रलयं व्रजेत् ।
अहंहि भगवानीशः स्वयंज्योतिः सनातनः ॥ ४७ ॥

परमात्मा परंब्रह्म मत्तो ह्यन्यन्न विद्यते ।
इत्येतत्परमं ज्ञानं भवते कथितं मया ॥ ४८ ॥

ज्ञात्वा विमुच्यते जंतुर्जन्म संसारबंधनात् ।
मायामाश्रित्य जातोऽहं गृहे दशरथस्य हि ॥ ४९ ॥

रामोऽहं लक्ष्मणो ह्येष शत्रुघ्नो भरतोऽपि च ।
चतुर्धा संप्रभूतोऽहं कथितं तेऽनिलात्मज ॥ ५० ॥

मायास्वरूपं च तव कथितं यत्प्लवंगम ।
कृपया तद्धृदा धार्यं न विस्मर्तव्यमेव हि ॥ ५१ ॥

येनायं पठ्यते नित्यं संवादो भवतो मम ।
जीवन्मुक्तो भवेत्सोऽपि सर्वपापैः प्रमुच्यते ॥ ५२ ॥

श्रावयेद्वा द्विजाञ्छुद्धान्ब्रह्मचर्यपरायणान् ।
यो वा विचारयेदर्थं स याति परमां गतिम् ॥ ५३ ॥

यश्चैतच्छृणुयान्नित्यं भक्तियुक्तो दृढव्रतः ।
सर्वपापविनिर्मुक्तो ब्रह्म लोके महीयते ॥ ५४ ॥

तस्मात्सर्वप्रयत्नेन पठितव्यो मनीषिभिः ।
श्रोतव्यश्चापि मंतव्यो विशेषादब्राह्मणैः सदा ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकाण्डे भगवद्धनुमत्संवादो नाम चतुर्दशः सर्गः ॥ १४ ॥